# संगमनी

## संस्कृतविभागः

## संस्कृतवृत्त संवाहिका

### कालिन्दीमहाविद्यालयः

### दिल्ली विश्वविद्यालयः

NAAC accredited Grade 'A+'

द्वितीयः अंकः अप्रैल 2024

# अनुक्रमणिका


प्रधानाचार्यायाः सन्देशः

संपादिकानां सन्देशः

विभागस्य गतिविधयः

दशदिवसीयसंस्कृतसंभाषणकार्यशाला

विशिष्टव्याख्यानम्

प्रतियोगिताः

गद्यपाठप्रतियोगिता

श्लोकोच्चारणप्रतियोगिता चित्रकर्मप्रतियोगिता च

भगवद्गीतास्मृत्याधारितश्लोकोच्चारणप्रतियोगिता प्रश्नमञ्चप्रतियोगिता च

छात्राणां रचनात्मकलेखाः








# प्रधानाचार्यायाः सन्देशः



**अमृतं संस्कृतं मित्र ! सरसं सरलं वचः। एकतामूलकं राष्ट्रे, ज्ञानविज्ञानपोषकम्॥**

अद्यत्वे संस्कृतं प्रति सम्पूर्णविश्वस्य जनानां रुचिर्वर्धमाना दरीदृश्यते। भारतवर्षे प्राचीनकाले ज्ञानविज्ञानविषये, स्वास्थ्यविषये, समाजसंस्कृतिविषये यत् किमपि विचारितम् अनुसन्धितं तत्सर्वम् प्रायशः संस्कृतमाध्यमेनैव प्रकाशितम् अभवत्। इयं ज्ञानराशिः अद्यापि न केवलं मानवानां अपितु सर्वेषाम् प्राणिनाम् अथ च पाञ्चभौतिकतत्त्वानाम् रक्षणाय, पोषणाय च सर्वथा समर्था दरीदृश्यते। इयं ज्ञानराशिः लोकसमक्षं प्राकाश्यम् यायादिति मनसि कृत्वा कालिन्दीमहाविद्यालयस्य संस्कृतविभागस्य अध्यापकाः छात्राश्च सम्मिल्य निरन्तरं प्रयतमानाः सन्ति अस्मिन्नेव क्रमे विगतपर्याये विभिन्नानाम् कार्यक्रमाणाम् आयोजनं कृतम् तेषां संक्षिप्तं वृत्तं संगमनीति वृत्तसंवाहिकाया माध्यमेन इदंप्रथमतया प्रकाशितं। इदानीम् अस्मिन् पर्याये संस्कृतज्ञानराशिः सर्वेषाम् उपकारकरणाय प्रकल्पताम् इति मनसि कृत्वा विभिन्नानाम् कार्यक्रमाणाम्संस्कृतविभागद्वारा आयोजनं कृतम् अथ च तेषां संक्षिप्तं वृत्तं द्वितीयसंस्करणेऽस्मिन् प्राकाश्यमेतीत्येतदर्थं संस्कृतविभागस्य अध्यापकानां छात्राणां च कृते मत्पक्षतः वर्धापनानि।

**प्रो.(डॉ.) मीना चरांदा**
**प्राचार्या**
**कालिन्दी महाविद्यालयः**

# संपादिकानां सन्देशः



डॉ. दिव्या मिश्रा  डॉ. ऋचा  डॉ. निशा गोयलः

**क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।**
**क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम् ॥**

अत्यन्तहर्षस्य विषयोऽयं यत् कालिन्दीमहाविद्यालयस्य संस्कृतपत्रिकायाः प्रथमसंस्करणस्य सफलप्रकाशनस्य पश्चात् अनतिचिरमेव द्वितीयसंस्करणमिदं सुधीजनानां समक्षम् आयाति। संस्कृतभाषायां साहित्यनिधिना सहैव सङ्गीतादि-ललित-कलानां विषयेऽपि विपुलं वाङ्मयम् उपलभ्यते । संस्कृतविभागद्वारा पठनपाठनाभ्यां सहैव छात्राणां सर्वांगीणविकासाय संस्कृतश्लोकगायन-चित्रकर्म-प्रश्नमञ्चादिप्रतियोगितानाम् आयोजनम् क्रियते।
अस्यां पत्रिकायां संस्कृतकार्यक्रमेषु छात्राणां सहभागस्य, तासां रचनात्मककौशलस्य च दिग्दर्शनं सन्निहितमस्ति। संस्कृतसंस्कृतिसंरक्षणाय कालिन्दीमहाविद्यालयस्य संस्कृतविभागस्य महान् पादक्षेपोऽयम् । आशास्महे वयं यत् एवमेव संस्कृतकार्यक्रमाणाम् आयोजनम्, छात्राणां रचनात्मकतायाः वृद्धिश्च भवेत्।

**सर्वेषां मंगलं भूयात्**

# विभागस्य गतिविधयः



# दशदिवसीयसंस्कृतसंभाषणकार्यशाला






कालिन्दीमहाविद्यालयस्य संस्कृतविभागः संस्कृतभारत्याः संयुक्ततत्वावधाने प्रतिवर्षं संस्कृतसंभाषणशिविराणि आयोजयति। प्रतिवर्षानुगुणं त्रयोविंशत्युत्तरद्विसहस्रतमे वर्षे अपि अप्रैलमासस्य दशमदिनांकतः एकविंशतिदिनांकपर्यन्तं संस्कृतसम्भाषणशिविरस्य आयोजनं विहितम्। दशदिवसीयः एषः कार्यक्रमः विभागाध्यक्षायाः डॉ. निशागोयलमहाभागायाः सान्निध्ये सम्पन्नः अभूत्। कार्यक्रमेऽस्मिन्पंचाशदधिकाः छात्राः सोत्साहं सहभागं कृतवत्यः। कार्यक्रमस्य उद्घाटन-समारोहे संस्कृत-भारत्याः प्रान्तसंगठनमंत्री डॉ. विवेककौशिकः मुख्यातिथित्वेन समुपस्थितः अभवत्। विवेककौशिकमहोदयस्य ओजस्विभाषणेन संस्कृतसंभाषणं शिक्षितुम् आगतानां छात्राणां मध्ये उत्साहस्य प्रसारः अभवत्। अस्माकं प्रधानाचार्या प्रो. मीनाचरान्दामहोदया स्वीयोद्बोधनेन छात्राः प्रोत्साहितवती। दिल्लीविश्वविद्यालयतः पंकजमहोदयः संभाषणकार्यक्रमस्य अध्यापकरूपेण कार्यक्रमे सहभागिताम् आवहत्। तेन सह मनीषमहोदयः, दीपकमहोदयः च सहशिक्षकौ आस्ताम्।

कार्यक्रमस्य समापनसमारोहे दिल्लीविश्वविद्यालयस्य सहाध्यापकः डॉ. धनञ्जयः कुमारः, राष्ट्रीयसंग्रहालयस्य सहाध्यापकः श्रीसुशीलकुमारः च संस्कृतसंभाषणस्य आयोजनाय संस्कृत-विभागं वर्धापितवन्तौ, ताभ्याम्अधिकाधिकसंस्कृतसंभाषणाय छात्राः संप्रेरिताः। कार्यक्रमस्य अन्तिमे दिने छात्राः संभाषणशिविरस्य स्वीयानुभवं प्रस्तुतवत्यः। ततः छात्राः दशदिवसीयसंभाषणकार्यक्रमे भागग्रहणस्य प्रमाणपत्रम् अपि प्राप्तवत्यः।

अन्ते शान्तिमन्त्रोच्चारणपूर्वकम् अस्य संभाषण-शिविरस्य सुमंगलसमाप्तिः अभवत्।





# विशिष्टव्याख्यानम्




कालिन्दीमहाविद्यालयस्य संस्कृतविभागस्य संस्कृतसाहित्यपरिषदा त्रयोविंशत्यधिकद्विसहस्रतमेऽब्दे मईमासस्य तृतीयदिनाङ्के 'कारकविभक्तिविमर्शः' इति विषये एकस्य विशिष्टव्याख्यानस्य आयोजनं कृतम्। व्याख्यानेऽस्मिन् आदौ कालिन्दी- महाविद्यालयस्य प्राचार्यया प्रो० मीनाचरान्दामहोदयया मुख्यातिथेः स्वागतवचोभिः सत्कारः कृतः। अस्मिन् कार्यक्रमे दिल्लीविश्वविद्यालयस्य विभागाध्यक्षः प्रो. ओमनाथबिमली महोदयः मुख्यातिथिरूपेण राराजत्। महोदयः अतिसारल्येन विभक्तिकारकयोर्भेदं, प्रयोगश्च प्रस्तुतवान्। व्याख्यानमिदं न केवलं छात्राणां कृते अपितु अध्यापकानां कृतेऽपि रुचिकरम्, लाभप्रदञ्च आसीत्।

एषः कार्यक्रमः विभागाध्यक्षायाः डा० निशागोयलमहाभागायाः सान्निध्ये सम्पन्नः अभूत्। विशिष्टव्याख्यानेऽस्मिन् संस्कृतविभागस्य सर्वाः प्राध्यापिकाः स्वं महत्त्वपूर्णं योगदानं दत्तवत्यः।








# प्रतियोगिताः

# गद्यपाठप्रतियोगिता




संस्कृतच्छात्राणां प्रतिभां प्रोत्साहयितुं कालिन्दीमहाविद्यालयस्य संस्कृतविभागेन नवम्बरमासे षड्-विंशतिदिनाङ्के द्विविंशत्यधिकद्विसहस्रतमेऽब्दे आभासीयमाध्यमेन सायं चतुर्वादने महाविद्यालयानां छात्राणां कृते गद्यपाठप्रतियोगिता आयोजिता। प्रतियोगितायां विभागस्य अध्यापिके डॉ.हरविन्दर कौरः , डॉ. शशी बाला च निर्णायिकारूपेण समुपस्थितवत्यः| अस्यां प्रतियोगितायां बहवश्छात्राः भागमग्रहणन् । विजेत्र्यः पुरस्कारान् प्राप्तवत्यः ।

## विजेतृणां सूची

| क्रमांकः | नाम | वर्षः | पुरस्कारः |
|---|---|---|---|
| 1 | प्रिया | तृतीयवर्षः | प्रथमः |
| 2 | नेहा श्रीवास्तवः | तृतीयवर्षः | द्वितीयः |
| 3 | प्राञ्जलिः | द्वितीयवर्षः | तृतीयः |
| 4 | उर्विता | तृतीयवर्षः | सांत्वना |









# श्लोकोच्चारणप्रतियोगिता चित्रकर्मप्रतियोगिता च

कालिन्दीमहाविद्यालयस्य संस्कृतविभागेन जनवरीमासे एकत्रिंशत्दिनाङ्के त्रयोविंशत्यधिकद्विसहस्रतमेऽब्दे संस्कृतच्छात्राणां प्रतिभां प्रोत्साहयितुं श्लोकोच्चारणप्रतियोगिता चित्रकर्मप्रतियोगिता च आयोजिते। प्रतियोगितयोः डॉ. मंजू लता , डॉ. दिव्या मिश्रा च निर्णायिकारूपेण छात्राणाम् उत्साहवर्धनं कृतवत्यौ। श्लोकोच्चारणप्रतियोगितायां चित्रकर्मप्रतियोगितायां च बहवः छात्राः सोत्साहं भागमगृहणन्।





**श्लोकोच्चारणप्रतियोगितायां विजेतॄणां सूची**

| विजेतॄणां सूची | | |
|---|---|---|
| श्वेता | तृतीयवर्षः | प्रथमः |
| खुशी पाण्डेयः | प्रथमवर्षः | द्वितीयः |



# चित्रकर्मप्रतियोगिता

| विजेतॄणां सूची | | |
|---|---|---|
| मान्या | द्वितीयवर्षः | प्रथमः |
| अल्पना कुमारी | द्वितीयवर्षः | द्वितीयः |
| ईशा बंगा | प्रथमवर्षः | तृतीयः |



# भगवद्गीतास्मृत्याधारितश्लोकोच्चारणप्रतियोगिता प्रश्नमञ्चप्रतियोगिता च

कालिन्दीमहाविद्यालयस्य संस्कृतविभागेन त्रयोविंशत्यधिकद्विसहस्रतमेऽब्दे फ़रवरीमासस्य अष्टमदिनांके भगवद्गीतास्मृत्याधारितश्लोकोच्चारणप्रतियोगिता, चित्रकर्मप्रतियोगिता च समायोजिते। तत्र नैकाभिः छात्राभिः सोत्साहं भागः गृहीतः। निर्णायकरूपेण विभागस्य प्राध्यापकाभ्यां डॉ.देशराज, डॉ.शिवकुमार महोदयाभ्यां छातृणां उत्साहवर्धनं कृतम्।







| भगवद्गीतास्मृत्याधारितश्लोकोच्चारणप्रतियोगितायां विजेतृणां सूची | | | |
|---|---|---|---|
| 1 | श्रद्धा | तृतीयवर्षः | प्रथमः |
| 2 | प्रिया | तृतीयवर्षः | द्वितीयः |
| 3 | श्वेता | तृतीयवर्षः | तृतीयः |
| 4 | निहारिका | तृतीयवर्षः | तृतीयः |

# प्रश्नमञ्चप्रतियोगिता




| विजेतॄणां सूची | | | |
|---|---|---|---|
| 1 | उर्विता | द्वितीयवर्षः | प्रथमः |
| 2 | चञ्चलः | तृतीयवर्षः | द्वितीयः |






# छात्राणां रचनात्मकलेखाः

# आयुर्वेदेन रोगाणाम् अपाकरणम्

आयुर्वेदस्य इतिहासः वैदिककालादेव आरभ्यते। अतः पञ्चसहस्रवर्षेभ्योऽपि प्राचीनोऽयं इतिहासः। विशेषतः क्रीस्तपूर्वचतुर्थशतकादारभ्य क्रीस्तशतकस्य ११ शतकपर्यन्तम् आयुर्वेदस्य उत्कृष्टपरम्पराः न केवलं प्रचारे आसन् अपि तु तत्कालीनेषु प्रख्यातेषु नालन्दा, विक्रमशिला, वलभी इत्यादिषु विश्वविद्यालयेषु प्रमुखविषयत्वेन पाठ्यन्ते स्म। भारतीयैः सह विदेशीयच्छात्रा अपि अस्य प्रयोजनं प्राप्तवन्त आसन्। स्वास्थ्यरक्षणे आयुर्वेदस्य प्राधान्यमभिलक्ष्य आयुर्वेदः अथर्ववेदस्य उपवेदत्वेन प्रथां भजते। मतमिदं चरकसुश्रुतवाग्भटादिभिः प्रमुखायुर्वेदाचार्यैरेव प्रकाशितम् ।

**आयुर्वेदानुसारेण आयुः चतुर्विधम् - हितायुः, अहितायुः, सुखायुः, दुःखायुश्चेति।**

**हिताहितं सुखं दुःखं आयुस्तस्य हिताहितम् ।**
**मानं च तच्च यत्रोक्तं आयुर्वेदः स उच्यते ॥**

मानसिकशारीरिकरोगरहितस्य ज्ञानिनः सुदृढस्य मानवस्य आयुः सुखायुः। एतद्विपरीतं दुःखायुः। अरिषड्वर्गं विजित्य सर्वभूतहिते रतस्य आयुः हितायुः। तद्विरोधे अहितायुः भवति। आयुश्च शरीरेन्द्रियसत्त्वात्मसंयोगः। इत्थं हि शरीरं तु नानाविध-आधि-व्याधीनाम् आगारमेव। अतः व्याध्युपसृष्टानां व्याधिपरिमोक्षः, स्वस्थस्य स्वास्थ्यरक्षणं च आयुर्वेदस्य द्वे प्रयोजने स्तः।

चरकाचार्यविरचिता 'चरकसंहिता', सुश्रुताचार्यप्रणीता 'सुश्रुतसंहिता', वाग्भटग्रथितम् 'अष्टाङ्गहृदयम्', माधवकरस्य 'माधवनिदानम्', शार्ङ्गधरस्य 'शार्ङ्गधरपद्धतिः' इत्यादयः आयुर्वेदस्य प्रमुखग्रन्थाः सन्ति। चरकसंहितायां ३४१ सस्यजन्यद्रव्याणां, १७७ प्राणिजन्यद्रव्याणां, ६४ खनिजद्रव्याणां च उल्लेखः कृतोऽस्ति। ग्रन्थस्यास्य महत्त्वमभिलक्ष्य अस्य नैकानि व्याख्यानानि रचितानि। चरकसंहितायां अष्टौ स्थानानि सन्ति। मूलतः एषा अग्निवेशेन रचिता संहिता। तत्र चरकमहर्षिणा प्रतिसंस्कारः कृतः। ततः दृढबलनाम्ना अपरेण वैद्येन संपूरणं कृतम्। एवम् अद्य उपलब्धायां चरकसंहितायाम् एषां त्रयाणां कर्तृत्वं विद्यते।

**नेहा श्रीवास्तवः**
**स्नातक तृतीयवर्षः**

# आरोग्यं सर्वार्थसाधनम्

यदि मानवस्य शरीरं स्वस्थं भवति तर्हि तस्य आत्मा, मनः इन्द्रियाणि च प्रसन्नानि भवन्ति । स्वस्थं शरीरं व्याधिरहितं शरीरम् वा तदैव भवति यदा मानवः सम्यक् व्यवहारं करोति । स्वस्थस्य शरीरस्य कृते सर्वोत्तमः उपायः व्यायामः एव । शारीरिकक्रीडा, धावनं, नृत्यं, श्रमसाध्यं कार्यं, चलनं च व्यायामाः भिन्नाः भिन्नाः सन्ति । क्रीडा सर्वोत्तमः रोचकः च व्यायामरूपः अस्ति ।

व्यायामस्य लाभाः-

**व्यायामात् लभते स्वास्थ्यं दीर्घायुष्यं बलं सुखम् ।**
**आरोग्यं परमं भाग्यं स्वास्थ्यं सर्वार्थसाधनम् ॥**

भ्रमण-धावन-क्रीडनादिभिः शरीरस्य श्रान्तिः व्यायामः कथ्यते । व्यायामः नित्यं करणीयः भवति । अस्य नित्यानुष्ठानेन गात्राणि पुष्टानि भवन्ति । यदि मनुष्यः दीर्घायुः वाञ्छति, तर्हि तेन नियमितरूपेण व्यायामः करणीयः। स्वास्थरक्षायै व्यायामः अतीव आवश्यकः अस्ति। नियमित-व्यायामनैव शरीरं नीरोगं जायते । नियमितव्यायामेन शरीरे रोगाः न उद्भवन्ति। शरीरस्य रोगेभ्यः रक्षणाय व्यायामः आवश्यकः , तथा उचिताहारसेवनमपि आवश्यकम्। व्यायामेन क्षुधावर्धनं भवति, किन्तु उचितं भोजनमेव सेवितव्यम्। चरकसंहितायां कथितम् -

'न अदेशे, न अकाले, न प्रतिकूलोपहित, न पर्युषितम् अन्नं सेवितव्यम्।' यदि आहारः उचितो नास्ति तर्हि व्यायामस्य कः उपयोगः?

स्वस्थस्य शरीरस्य महत्त्वम् अस्ति प्रसन्नं मनः, प्रसन्ना प्रज्ञा, प्रसन्न आत्मा ।

**स्वस्थे शरीरे एव स्वस्थं मस्तिष्कं भवति**

**नियति मिश्रा**
**स्नातक प्रथमवर्षः**



## पथ्यापथ्य विमर्शः

आरोग्यं स्थापयितुं स्निग्धभोजनं न खादितव्यं, गुरुभोजनं न खादितव्यं यतः शरीरे आलस्यं जनयति । एकदा एव अधिकं न खादतु। यदि भवन्तः स्वस्थं गृहनिर्मितं च भोजनं खादन्ति अपि, यदि भवन्तः अन्नस्य परिमाणं नियन्त्रयितुं न शक्नुवन्ति तर्हि भवन्तः वजनवृद्धिं निवारयितुं न शक्नुवन्ति अतः अन्नस्य परिमाणं अर्थात् भागस्य नियन्त्रणं अतीव महत्त्वपूर्णम् अस्ति ।

प्रातःभोजनं न त्यजन्तु। कियत् अपि त्वरितम् अस्ति चेदपि प्रातःभोजनं कदापि न लङ्घयन्तु। अस्माकं देशे उक्तिः अस्ति यत् नृप इव प्रातः भोजनं खादितव्यम् इति। यदि प्रातःकाले रिक्तं उदरं धारयन्ति तर्हि अग्रिमेषु भोजनेषु अतिभोजनस्य सम्भावना अधिका भवति । अधिकं शर्करां न खादन्तु। शर्करायाः अतिरिक्तसेवनेन स्थूलतायाः, रक्तशर्करायाः च सम्भावना बहुधा वर्धते । अतः यथाशक्ति संसाधित-पैक्ड्-आहार-भोजनं परिहरन्तु, यतः तेषु शर्करायाः मात्रा अतीव अधिका भवति ।

**श्वेता**
**स्नातक तृतीयवर्षः:**

## पुरुषार्थ-चतुष्टयमारोग्यञ्च

धर्मार्थकाममोक्षेति चतुर्विधपुरुषार्थसाधनमेव परमलक्ष्यमिति भारतीयाः मन्यन्ते। तान् पुरुषार्थान् साधयितुं काय- वाङ्मनांसि इति त्रिकरणसाधनान्येव भवन्ति। तानि त्रिकरणान्युपयुज्य एकां समीचीनाजीवनशैलीं लेखेऽस्मिन् विवक्षामि।

"योगक्षेमं वहाम्यहम् " इति खलु गीतायाः वचनम्। किं वा योगक्षेमेति जिज्ञासिते सति आह- "अलब्धस्य लाभः योगः लब्धस्य परिपालनं क्षेमः इति।" आयुर्वेदस्योद्देश्यमपि स्वस्थस्य स्वास्थ्यरक्षणम् आतुरस्य विकारप्रशमनम्" इति अस्ति। आरोग्यस्य प्राप्तिः योगः आतुरस्य प्रशमनं क्षेम इति। तर्हि रोगनिवारणस्यापेक्षया रोगनिरोधमेव क्षेम इति सर्वैर्विदितमेव। कालिदासोऽपि "शरीरमाद्यं खलु धर्मसाधनम्" इति अवदत्। भारतीयसम्प्रदायेषु चतुर्विधपुरुषार्थानां प्राधान्यात्तु पुरुषार्थसाधनार्थं शरीरं संरक्षणीयमिति । तदर्थमेव आयुर्वेद - योगादयः समुदिताः।

भारतीयसिद्धान्तेषु कर्मसिद्धान्तोऽपि अन्यतमः। स्वकर्मफलं भोक्तुं जन्तवः जायन्ते इति सिद्धान्तः। स्व- प्राग्जन्मार्जितम् कर्माऽपि व्याधिरूपेण बाधते इति ज्योतिश्शास्त्रोक्तिरियम्-

**"पूर्वजन्मार्जितं कर्म व्याधिरूपेण बाधते।**
**तच्छान्तिरौषधि दानैःजपहोमतपादिभिः।।" इति।**

एवं मानवः पुरूषार्थानाम् सिद्धयै स्वस्थः एव भवेत्। यदि कदाचित् रूग्णोऽपि भवति तर्हि औषधिदानैः तप आदिभिश्च रोगाः निवारणीयाः। तदैव जीवनस्य सार्थक्यम्।

**साक्षी झा**
**स्नातक प्रथमवर्षः**

# सुस्वास्थ्यस्य मूलं सद्वृत्तता

आरोग्यं प्रति सद्वृत्ततायाः अतीव महत्वं अस्ति । न हि कोऽपि बालः जानाति यत् किं सद्वृत्तम्, किं च असद्वृत्तम्। बालस्तु ज्येष्ठान् वृद्धान् च पश्यति । ते वयोवृद्धाः यथा-यथा आचरन्ति बालोऽपि तथैव आचरति । शिष्टानां वंशेषु वृद्धाः, युवानः, बालाः महिलाश्च सर्वे परस्परं सभ्यतया आलपन्ते, ते अन्योऽन्यं सम्मानयन्ति । ज्येष्ठानां सद्व्यवहारं दृष्ट्वा शिशवोऽपि परस्परं 'जी' शब्देन सर्वान् आकारयन्ति, अपशब्दान् न वदन्ति, सर्वान् सत्कुर्वन्ति च ते वयोवृद्धानाम् आज्ञां पालयन्ति ।

अतो विपरीतमेतद् दृश्यते यत् कस्मिंश्चिद् परिवारे सर्वे सदस्याः परस्परम् अपशब्दैः व्यवहरन्ति, न कोऽपि कस्यापि पूज्यस्य आज्ञां पालयति । तत्र लघवोऽपि जातकाः तथैव शिक्षन्ते। ते च युवानः भूत्वा अपि कुसंस्कार-वशीभूताः जगति स्वैः सह तथैव व्यवहरन्ति । येन ते जगति अपमानं निन्दां च लभन्ते । अतः सर्वतः : प्राक् ज्येष्ठेभ्यः वृद्धेभ्यश्च एतद् उचितम्, यत्ते परिवारे सभ्यतया परस्परं व्यवहरन्तु । विद्यालयेऽपि गुरवः छात्रैः सह सद्भावेन व्यवहरन्तु । ज्येष्ठाः छात्राश्च लघुभिः छात्रैः सह स्नेहेन व्यवहारं कुर्वन्तु । इत्थं बालाः बाल्ये सद्वृत्तं शिक्षन्ते ।

अथ च नरः निम्नस्थान् सदाचारनियमान् पालयेत् । तद्यथा- प्रातःकाले उत्थाय मातापितरौ, वृद्धान्, गुरून् च प्रणमेत् । तेषाम् आज्ञां पालयेत्, तान् सेवेत च । इत्थं करणेन पुरुषाणां आयुः, विद्या, यशः बलं च-एतानि चत्वारि सत्त्वानि वर्धन्ते ।

नरः कदापि असत्यं न वदेत् । परधनं न हरेत् । पापं न आचरेत्। मूर्खैः सह मित्रतां न कुर्यात्। अपशब्दान् न वदेत्। अलसः न भूयात् ।

मनुष्यः यत्नेन ब्रह्मचर्यं पालयेत् । स्वदेशाय धर्माय कुलाय च प्राणानपि त्यजेत् । ईश्वरं भजेत्। समयानुसारं हितं मधुरं च वदेत्। स्वहितं कदापि न त्यजेत्। निर्धनेभ्यः दानं यच्छेत्। विद्योपार्जने धनोपार्जने च सदा प्रयत्नशीलः स्यात् ।

उक्तनियमानां पालनेन नराः सदाचारिणः उन्नतिशीलाः संसारे सम्मानिताः च भवन्ति। अतः अस्माभिः अपि उक्तानां सदाचारनियमानां पालने तत्परैः भवितव्यम्।

**काजल शुक्ला**
**स्नातक द्वितीयवर्षः**



Deepanshi



Neha Srivastava





Preeti





Deepanshi







# संस्कृतविभागस्य पक्षतः भवद्भ्यः सर्वेभ्यो हार्दिकाः धन्यवादाः



संस्कृतविभागः
कालिन्दीमहाविद्यालयः
दिल्ली विश्वविद्यालयः
अप्रैल 2024